# BIBLIOTHECA INDICA:

A

# COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

## ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 60, 74, 88, 97, 130, 144, 159, 169, 203, 226 and 263.

---

# THE TAITTIRI'YA A'RAṆYAKA

OF THE

BLACK YAJUR VEDA,

WITH THE

COMMENTARY OF SA'YAṆA'CHA'RYA.

EDITED BY

RA'JENDRALA'LA MITRA,

*Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, and of the Physical Class of the Imperial Academy of Sciences, Vienna; Corresponding Member of the German and of the American Oriental Societies, and of the Royal Academy of Science, Hungary; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.*

---

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1872.

इतश्चामुतश्चाव्यतीपाती। तमिति[२१] । [२२]योऽग्नेर्मिथूया वेद। मिथुनवान् भवति। आपो वा अग्नेर्मिथूयाः। मिथुनवान् भवति॥ य एवं वेद[२२] ॥ १२ ॥

वेद, भवति, आयतनम्, आयतनवान् भवति, वेद, वेद,प्रत्येव तिष्ठति,गुल्फदघ्नं, चातुर्मास्येषु,अमुमादित्यं प्रत्यक्षेण कमग्निं चिनुते, उपानुवाक्यमाशुमग्निं चिन्वानः, मिथुनवान् भवति, एकञ्च॥ अनु० २२ ॥

पुष्यम्, अग्निः, वायुः, असौ वै तपं, चन्द्रमा, नक्षत्राणि, पर्जन्यः, संवत्सरः, तिष्ठति, सचियꣳ, सꣳवत्सरꣳ, सावित्रम्, अमुम्, नाचिकेतं, प्राणान्, चातुर्होत्रियं, ब्रह्म, वैश्वसृजꣳ, शरीरम्, उपानुवाक्यमाशुम्, इमान्, लोकान्, इममारुणकेतुकं, य एवासौ, ॥

---

आरुणकेतुकाग्नेरपाञ्च सम्बन्धरूपो यो मिथुनीभावः तद्वेदनं प्रशंसति। [२२]"योऽग्नेर्मिथूया ० य एवं वेद"[२२] इति। 'मिथूयाः' मिथुनगमनाः,'मिथुनवान्' मिथुनशक्तिमान्, वेदनफलस्य पुनर्वचनमुपसंहारार्थं ॥

इति सायनाचार्यविरचिते माधवीये वेदार्थप्रकाशे यजुरारण्यके प्रथमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥



अथ त्रयोविंशोऽनुवाकः ।

[१]आपो वा इदमासन्त्सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामः समवर्तत। इदꣳ सृजेयमिति। तस्माद्यत् पुरुषो मनसाभिगच्छति। तद्वाचा वदति। तत् कर्मणा करो-

अथ त्रयोविंशोऽनुवाकः ।

अथास्मिन्नप्यनुवाके सृष्ट्युपन्यासमुखेनारुणकेतुकमग्निं तदङ्गभूता अपश्च प्रशंसति। तत्र सृष्ट्यादौ कामोत्पत्तिं दर्शयति। [१]"आपो वा ० तदेषाभ्यनूक्ता"[१] इति। यत् 'इदं' जगत्, इदानीमस्माभिर्दृश्यते तत् 'इदम्', उत्पत्तेः पूर्वम् 'आपः', एव 'सन्', न तु देवतिर्यङ्मनुष्यादिकं किञ्चिदपि भौतिकमासीत्। पृथिव्यादिभूतान्तरमपि वारयितुं 'सलिलमेव', इत्युच्यते। तास्वप्सु मध्ये कस्मिंश्चित् 'पुष्करपर्णे', जगदीश्वरः 'स प्रजापतिः', 'समभवत्' सम्यगाविर्भूयावस्थितः, 'तस्य' प्रजापतेः, मनोमध्ये सर्वम् 'इदं' जगत्, 'सृजेयम्', इत्येवं 'कामः', उदपद्यत। यस्मात् प्रजापतेर्वाक्छरीरप्रभृतिभ्यां पूर्वं सर्वप्रवृत्तिहेतुः कामो मनस्याविरभूत्। 'तस्मात्', प्रजापतिसन्ततावुत्पन्नः सर्वः 'पुरुषः', इदं कार्यं करिष्यामीत्यादौ 'मनसा', चिन्तयति, 'तत्' तथैव, 'वाचा वदति', 'कर्मणा'

ति। तद्देषाभ्यनूक्ता[१]। [२]कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत् ॥ १ ॥

सतो बन्धुमसति निरविन्दन्। हृदि प्रतीष्या कवयो मनीषेति[२]। [३]उपैनं तदुपनमति। यत्कामो

शरीरव्यापारेणापि, तथैव 'करोति', 'तत्' तस्मिन् कामस्य प्रथमोत्पत्तिलक्षणेऽर्थे, काचिदृक् शाखान्तरे 'अभ्यनूक्ता' ॥

तामेतामृचं दर्शयति। [२]"कामस्तदग्रे ० कवयो मनीषेति"[२] इति। 'तत्' तदानीं सृष्टिकाले, प्रजापतेः सकाशात् 'अग्रे' प्रथमं, 'कामः' सर्वं सृजेयमित्यभिलाषः, 'अधिसमवर्त्तत' आधिक्येन सम्यगुत्पन्नः, 'यत्' यदा, 'मनसः प्रथमं, 'रेतः' कार्यम्, 'आसीत्'। तदिति पूर्वत्रान्वयः। पूर्वसृष्टौ लीनायामव्यक्ते जगत्कारणे स्रक्ष्यमाणप्राणिकर्मोद्भवे सति यदा प्रजापतेर्मानसं प्रथमं कार्यमुत्पन्नं तदा तत्कार्यं सृष्टिविषयेच्छारूपेण निष्पन्नमित्यर्थः ॥ 'मनीषाः' मनस ईशितारः, 'कवयः' विद्वांसः, तत्तत्सृष्टिगताः प्रजापतयः, 'हृदि' स्वचित्ते, 'प्रतीष्य' प्रत्येकं निश्चित्य, 'सतः' विद्यमानस्य व्यक्तस्य जगतः, 'बन्धुं' बन्धकमुत्पत्तिहेतुं कामं, 'असति' अव्यक्ते कारणे, 'निरविन्दन्' निष्कृष्य लब्धवन्तः, न केवलमेतस्यामेव सृष्टौ किन्तु सर्वास्वपि सृष्टिषु प्रवृत्ताः प्रजापतयः काममेव प्रथमं लभन्त इत्यर्थः।



भवति। य एवं वेद[३]। [४]स तपोऽतप्यत। स तपस्तप्त्वा। शरीरमधूनुत। तस्य यन्मांसमासीत्। ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ॥ २ ॥

ये नखाः। ते वैखानसाः। ये बालाः। ते बालखि-

'इति'शब्दो मन्त्रसमाप्तौ। अनेन मन्त्रेणैकामिष्टकामुपदध्यात् ॥ तथा च बौधायन आह। 'कामस्तदग्र इति सङ्कल्पवतीमिति' ॥

यथोक्तकाममाहात्म्यवेदनं प्रशंसति। [३]"उपैनं ० य एवं वेद"[३] इति। 'यः' पुमान्, काममाहात्म्यं 'वेद', स पुमान् 'यत्कामः' यद्विषयकामनावान्, 'भवति', 'तत्' वस्तु, 'एनं' वेदितारम्, 'उपनमति' प्राप्नोति। देशकालयोः सामीप्यविवक्षया द्वावुपशब्दावुक्तौ ॥

कामानन्तरभाविनीं सृष्टिं दर्शयति। [४]"स तपोऽतप्यत ० सोऽपाम्"[४] इति। 'सः' प्रजापतिः, सृष्टिं कामयित्वा 'तपः', कृतवान्। नात्र तप उपवासादिरूपं, किन्तु स्रष्टव्यं वस्तु कीदृशमिति पर्यालोचनरूपं। अतएवाथर्वणिका आमनन्ति। 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इति। 'सः' प्रजापतिः, 'तपः' पर्यालोचनरूपं, कृत्वा स्रष्टव्यविशेषं निश्चित्य, स्वकीयं 'शरीरं', 'अधूनुत' कम्पितवान्। 'तस्य' कम्पनस्य शरीरस्य, 'यन्मांसं', अस्ति, तस्मान्मांसादरुणादिनामकास्त्रिविधाः 'ऋष-